श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीवामनपुराणे वामनप्रादुर्भावे

# ॥ श्रीगजेन्द्रमोक्षणम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीगजेन्द्रमोक्षणम् ॥

नारद उवाच

याञ्जप्यान्भगवद्भक्त्या प्रह्लादो दानवोऽजपत्।
गजेन्द्रमोक्षणादींस्त्वं चतुरस्तान् वदस्व मे॥ 1॥

पुलस्त्य उवाच

शृणुष्व कथयिष्यामि जप्यानेतांस्तपोधन।
दुःस्वप्ननाशो भवति यैरुक्तैः संस्मृतैः श्रुतैः॥ 2॥

गजेन्द्रमोक्षणं त्वादौ शृणु त्वं तदनन्तरम्।
सारस्वतौ ततः पुण्यौ पापप्रशमनौ स्तवौ॥ 3॥

सर्वरत्नमयः श्रीमांस्त्रिकूटो नाम पर्वतः।
सुतः पर्वतराजस्य सुमेरोर्भास्करद्युतेः॥ 4॥

क्षीरोदजलवीच्यग्रैर्धौतामलशिलातलः।
उत्थितः सागरं भित्त्वा देवर्षिगणसेवितः॥ 5॥

अप्सरोभिः परिवृतः श्रीमान्प्रस्रवणाकुलः।
गन्धर्वैः किन्नरैर्यक्षैः सिद्धचारणगुह्यकैः॥ 6॥

विद्याधरैः सपत्नीकैः संयतैश्च तपस्विभिः।
वृकद्वीपिगजेन्द्रैश्च धृतगात्रो विराजते॥ 7॥

पुन्नागैः कर्णिकारैश्च बिल्वामलकपाटलैः।
चूतनीपकदम्बैश्च चन्दनागुरुचम्पकैः॥ 8॥

शालैस्तालैस्तमालैश्च सरलार्जुनपर्पटैः।
यथान्यैर्विविधैर्वृक्षैः सर्वतः समलङ्कृतः॥ **9** ॥

नाना धात्वङ्कितैः शृङ्गैः प्रस्रवद्भिः समन्ततः।
शोभितो रुचिरप्रस्थैस्त्रिभिर्विस्तीर्णसानुभिः॥ **10** ॥

मृगैः शाखामृगैः सिंहैर्मातङ्गैश्च सदामदैः।
जीवं जीवकसंघुष्टैश्चकोरशिखिनादितैः॥ **11** ॥

तस्यैकं काञ्चनं शृङ्गं सेवते यद्दिवाकरः।
नानापुण्यसमाकीर्णं नानागन्धादिवासितम्॥ **12** ॥

द्वितीयं राजतं शृङ्गं सेवते यन्निशाकरः।
पाण्डुराम्बुदसङ्काशं तथा रत्नचयोपमम्॥ **13** ॥

वज्रेन्द्रनीलवैडूर्यतेजोभिर्भासयन्दिशः।
तृतीयं ब्रह्मसदनं प्रहृष्टं शृङ्गमुत्तमम्॥ **14** ॥

न तत्कृतघ्नाः पश्यन्ति नृशंसा नैव राक्षसाः।
नातप्ततपसो लोके ये च पापकृतो जनाः॥ **15** ॥

तस्य सानुमतः पृष्ठे सरः काञ्चनपङ्कजम्।
कारण्डवसमाकीर्णं राजहंसोपशोभितम्॥ **16** ॥

कुमुदोत्पलकह्लारैः पुण्डरीकैश्च शोभितम्।
कमलैः शतपत्रैश्च काञ्चनैः समलङ्कृतम्॥ **17** ॥

पत्रैर्मरकतप्रख्यैः पुष्पैः काञ्चनसन्निभैः।
गुल्मैः कीचकवेणूनां समन्तात्परिवेष्टितम्॥ **18** ॥

तस्मिन्सरसि दुष्टात्मा निगूढोऽन्तर्जलेशयः।
आसीद् ग्राहो गजेन्द्राणां दुराधर्षो महाबलः॥ **19** ॥

अथ दन्तोज्ज्वलवपुः कदाचिद्गजयूथपः।
मदस्रावी जलाकाङ्क्षी पादचारीव पर्वतः॥ 20 ॥

वासयन्मदगन्धेन गिरिमैरावतोपमः।
स गजोऽञ्जनसङ्काशो मदाघूर्णितलोचनः॥ 21 ॥

तृषितः स्नातुकामोऽसाववतीर्णश्च तज्जलम्।
सलीलः पङ्कजवने यूथमध्यगतस्त्वरन्॥ 22 ॥

गृहीतस्तेन रौद्रेण ग्राहेणाव्यक्तमूर्तिना।
पश्यन्तीनां करेणूनां क्रोशन्तीनां च दारुणम्॥ 23 ॥

ह्रियते पङ्कजवने ग्राहेणातिबलीयसा।
गज आकर्षते तीरं ग्राह आकर्षते जलम्॥ 24 ॥

तयोर्दिव्यं महायुद्धं जातं वर्षसहस्रकम्।
वारुणैः संयुतः पाशैर्निष्प्रयत्नगतिः कृतः॥ 25 ॥

वेष्ट्यमानः सुघोरैस्तु पाशैर्नागो दृढैस्तथा।
विस्फूर्य च यथाशक्ति विक्रोशश्च महारवान्॥ 26 ॥

व्यथितः सन्निरुच्छ्वासो गृहीतो घोरकर्मणा।
परमामापदं प्राप्य मनसाचिन्तयद्धरिम्॥ 27 ॥

स तु नागवरः श्रीमान्नारायणपरायणः।
तमेव शरणं देवं गतः सर्वात्मना तदा॥ 28 ॥

एकात्मानुगृहीतात्मा विशुद्धेनान्तरात्मना।
जन्मजन्मान्तराभ्यासाद्भक्तिमान्गरुडध्वजे॥ 29 ॥

आद्यं देवं महादेवं पूजयामास केशवम्।
मथितामृतफेनाभं शङ्खचक्रगदाधरम्॥ 30 ॥

सहस्रशुभनामानमादिदेवमजं विभुम्।
प्रगृह्य पुष्कराग्रेण काञ्चनं कमलोत्तमम्।
आपद्विमोक्षमन्विच्छन्गाजः स्तोत्रमुदीरयत्॥ 31॥

गजेन्द्र उवाच
ओं नमो मूलप्रकृतये अजिताय महात्मने।
अनाश्रिताय देवाय निःस्पृहाय नमोऽस्तु ते॥ 32॥

नम आद्याय वामाय आर्षायादिप्रवर्तिने।
अनन्तराय चैकाय अव्यक्ताय नमो नमः॥ 33॥

नमो गुह्याय गूढाय गुणाय गुणवर्तिने।
अतर्क्यायाप्रमेयाय अतुलाय नमो नमः॥ 34॥

नमः शिवाय शान्ताय निश्चिन्ताय यशस्विने।
सनातनाय पूर्वाय पुराणाय नमो नमः॥ 35॥

नमोऽस्तु तस्मै देवाय निर्गुणाय गुणात्मने।
नमो जगत्प्रतिष्ठाय गोविन्दाय नमो नमः॥ 36॥

नमोऽस्तु पद्मनाभाय साङ्ख्ययोगोद्भवाय च।
विश्वेश्वराय देवाय शिवाय हरये नमः॥ 37॥

नमोऽस्तु तस्मै देवाय निर्गुणाय गुणात्मने।
नारायणाय विश्वाय देवाय परमात्मने॥ 38॥

नमो नमः कारणवामनाय
नारायणायामितविक्रमाय।
श्रीशार्ङ्गचक्रासिगदाधराय
नमोऽस्तु तस्मै पुरुषोत्तमाय॥ 39॥

गुह्याय वेदनिलयाय महोरगाय
    सिंहाय दैत्यनिधनाय चतुर्भुजाय।
ब्रह्मेन्द्ररुद्रमुनिचारणसंस्तुताय
    देवोत्तमाय सकलाय नमोऽच्युताय॥ **40** ॥

नागेन्द्रभोगशयनाय च सुप्रियाय
    गोक्षीरहेमशुकनीलघनोपमाय।
पीताम्बराय मधुकैटभनाशनाय
    विश्वाय चारुमुकुटाय नमोऽक्षराय॥ **41** ॥

नाभिप्रजातकमलस्थचतुर्मुखाय
    क्षीरोदकार्णवनिकेतयशोधराय।
नानाविचित्रकनकाङ्गदभूषणाय
    सर्वेश्वराय वरदाय नमो वराय॥ **42** ॥

भक्तिप्रियाय वरदीप्तसुदर्शनाय
    देवेन्द्रविघ्नशमनोद्यतपौरुषाय।
फुल्लारविन्दविमलायतलोचनाय
    योगेश्वराय वरदाय नमो वराय॥ **43** ॥

ब्रह्मायनाय त्रिदशायनाय
    लोकायनायात्महितायनाय।
नारायणायात्मविकाशनाय
    महावराहाय नमस्करोमि॥ **44** ॥

कूटस्थमव्यक्तमचिन्त्यरूपं
    नारायणं कारणमादिदेवम्।
युगान्तशेषं पुरुषं पुरातनं
    तं देवदेवं शरणं प्रपद्ये॥ **45** ॥

योगेश्वरं चारुविचित्रमौलि -
मज्ञेयमग्र्यं प्रकृतेः परस्थम्।
क्षेत्रज्ञमात्मप्रभवं वरेण्यं
तं वासुदेवं शरणं प्रपद्ये ॥ **46** ॥

अदृश्यमव्यक्तमचिन्त्यमव्ययं
ब्रह्मर्षयो ब्रह्ममयं सनातनम्।
वदन्ति यं वै पुरुषं सनातनं
तं देवगुह्यं शरणं प्रपद्ये ॥ **47** ॥

यदक्षरं ब्रह्म वदन्ति सर्वगं
निशम्य यं मृत्युमुखात्प्रमुच्यते।
तमीश्वरं तृप्तमनुत्तमैर्गुणैः
परायणं विष्णुमुपैमि शाश्वतम् ॥ **48** ॥

कार्यं क्रियाकारणमप्रमेयं
हिरण्यनाभं वरपद्मनाभम्।
महाबलं देवनिधिं सुरेशं
व्रजामि विष्णुं शरणं जनार्दनम् ॥ **49** ॥

किरीटकेयूरमहार्हनिष्कै -
र्मण्युत्तमालङ्कृतसर्वगात्रम्।
पीताम्बरं काञ्चनभक्तिचित्रं
मालाधरं केशवमभ्युपैमि ॥ **50** ॥

नारोद्भवं वेदविदां वरिष्ठं
योगात्मनां साङ्ख्यविदां वरिष्ठम्।
आदित्यरुद्राश्विवसुप्रभावं
प्रभुं प्रपद्येऽच्युतमादिभूतम् ॥ **51** ॥

श्रीवत्साङ्कं महादेवं देवगुह्यं मनोरमम्।
प्रपद्ये सूक्ष्ममतुलं वरेण्यमभयप्रदम्॥ **52** ॥

प्रभवं सर्वभूतानां निर्गुणं परमेश्वरम्।
प्रपद्ये मुक्तसङ्गानां यतीनां परमां गतिम्॥ **53** ॥

भगवन्तं गुणाध्यक्षमक्षरं पुष्करेक्षणम्।
शरण्यं शरणं भक्त्या प्रपद्ये भक्तवत्सलम्॥ **54** ॥

त्रिविक्रमं त्रिलोकेशं सर्वेषां प्रपितामहम्।
योगात्मानं महात्मानं प्रपद्येऽहं जनार्दनम्॥ **55** ॥

आदिदेवमजं शम्भुं व्यक्ताव्यक्तं सनातनम्।
नारायणमणीयांसं प्रपद्ये ब्राह्मणप्रियम्॥ **56** ॥

नमो हराय देवाय नमः सर्वमहाय च।
प्रपद्ये देवदेवेशमणीयांसं तनोः सदा॥ **57** ॥

एकाय लोकतत्त्वाय परतः परमात्मने।
नमः सहस्रशिरसे अनन्ताय महात्मने॥ **58** ॥

त्वामेव शरणं दैवमृषयो वेदपारगाः।
कीर्तयन्ति च यं सर्वे ब्रह्मादीनां परायणम्॥ **59** ॥

नमस्ते पुण्डरीकाक्ष भक्तानामभयप्रद।
अब्रह्मण्य नमस्तेऽस्तु त्राहि मां शरणागतम्॥ **60** ॥

पुलस्त्य उवाच
भक्तिं तस्यानुसञ्चिन्त्य नागस्यामोघसम्भवः।
प्रीतिमानभवद्विष्णुः शङ्खचक्रगदाधरः॥ **61** ॥

सान्निध्यं कल्पयामास तस्मिन्सरसि केशवः।
गरुडस्थो जगत्स्वामी लोकाधारस्तपोधन॥ **62** ॥

ग्राहग्रस्तं गजेन्द्रं तं तं च ग्राहं जलाशयात्।
उज्जहाराप्रमेयात्मा तरसा मधुसूदनः॥ **63** ॥

जलस्थं दारयामास ग्राहं चक्रेण माधवः।
मोक्षयामास नागेन्द्रं पाशेभ्यः शरणागतम्॥ **64** ॥

एवं हि देवशापेन हूहूर्गन्धर्वसत्तमः।
ग्राहत्वमगमत्कृष्णान्मोक्षं प्राप्य दिवं गतः॥ **65** ॥

गजोऽपि विष्णुना स्पृष्टोजातो दिव्यवपुः पुमान्।
पापाद् विमुक्तौ युगपद्गजगन्धर्वसत्तमौ॥ **66** ॥

प्रीतिमान्पुण्डरीकाक्षः शरणागतवत्सलः।
अभवत्त्वथ देवेशस्ताभ्यां चैव प्रपूजितः॥ **67** ॥

इदं च भगवान्योगी गजेन्द्रं शरणागतम्।
प्रोवाच मुनिशार्दूल मधुरं मधुसूदनः॥ **68** ॥

श्रीभगवानुवाच
ये मां त्वां च सरश्चेदं ग्राहस्य च विदारणम्।
गुल्मकीचकवेणूनां रूपं मेरुसुतस्य च॥ **69** ॥

अश्वत्थं भास्करं गङ्गां नैमिषारण्यमेव च।
संस्मरिष्यन्ति मनुजाः प्रयताः स्थिरबुद्धयः॥ **70** ॥

कीर्तयिष्यन्ति भक्त्याच श्रोष्यन्ति च शुचिव्रताः।
दुःस्वप्नो नश्यते तेषां सुस्वप्नश्च भविष्यति॥ **71** ॥

मात्स्यं कौर्मं च वाराहं वामनं तार्क्ष्यमेव च।
नारसिंहं च नागेन्द्रं सृष्टिप्रलयकारकम्॥ 72 ॥

एतानि प्रातरुत्थाय संस्मरिष्यन्ति ये नराः।
सर्वपापैः प्रमुच्यन्ते पुण्यान् लोकानवाप्नुयुः॥ 73 ॥

पुलस्त्य उवाच
एवमुक्त्वा हृषीकेशो गजेन्द्रं गरुडध्वजः।
स्पर्शयामास हस्तेन गजं गन्धर्वमेव च॥ 74 ॥

ततो दिव्यवपुर्भूत्वा गजेन्द्रो मधुसूदनम्।
जगाम विष्णुं शरणं नारायणपरायणः॥ 75 ॥

ततो नारायणः श्रीमान्मोक्षयित्वा गजोत्तमम्।
पापबन्धाच्च शापाच्च ग्राहं चाद्भुतकर्मकृत्॥ 76 ॥

ऋषिभिः स्तूयमानश्च देवगुह्यपरायणैः।
ततः स भगवान्विष्णुर्दुर्विज्ञेयगतिः प्रभुः॥ 77 ॥

गजेन्द्रमोक्षणं दृष्ट्वा देवाः शक्रपुरोगमाः।
ववन्दिरे महात्मानं प्रभुं नारायणं हरिम्॥ 78 ॥

महर्षयश्चारणाश्च दृष्ट्वा गजविमोक्षणम्।
विस्मयोत्फुल्लनयनाः संस्तुवन्ति जनार्दनम्॥ 79 ॥

प्रजापतिपतिर्ब्रह्मा चक्रपाणेर्विचेष्टितम्।
गजेन्द्रमोक्षणं दृष्ट्वा इदं वचनमब्रवीत्॥ 80 ॥

य इदं शृणुयान्नित्यं प्रातरुत्थाय मानवः।
प्राप्नुयात्परमां सिद्धिं दुःस्वप्नश्च विनश्यति॥ 81 ॥

गजेन्द्रमोक्षणं पुंसां सर्वपापप्रणाशनम्।
कथितेन स्मृतेनाथ श्रुतेन च तपोधन॥ **82** ॥

एतत्पवित्रं परमं सुपुण्यं
सङ्कीर्तनीयं चरितं मुरारेः।
यस्मिन्किलोक्ते बहुपापबन्धना -
ल्लभेत मोक्षं द्विरदो नु यद्वत्॥ **83** ॥

अजं वरेण्यं वरपद्मनाभं
नारायणं ब्रह्मनिधिं सुरेशम्।
तं देवगुह्यं पुरुषं पुराणं
वन्दाम्यहं लोकपतिं वरेण्यम्॥ **84** ॥

॥ इति श्रीगजेन्द्रमोक्षणं समाप्तम्॥